कुमार सम्भव टीका

नं २



ॐ श्रीगणेशाय नमः ॥ अस्त्युत्तरस्यामिति ॥ कश्चित्पथिको धनं लिप्समानः संबोधनादिद्वारा तद्दातृत्वायुक्तं पृष्टस्तु वयन्त्वस्य
धनस्य प्राप्त्यासंभाव्यात्तेन याचामभिव्यनक्ति हे अस्त्युत्तरः अधिराज अहं मालयः स्यां अस्तीत्युत्तरं यस्य स तस्य संबोधनं वाच
काशयन्नात्र समनन्तरमेव वितरणोद्यतः अधिराजस्त्वं नः सिद्धोऽहं मालयः स्यां मायाः लक्ष्म्याः आलयः आश्रयः स्यामनेयं अधि
दूतसमर्पकं विशेषणमाह अनाम नगेति अनाम नं अन्यकारितः नम्रीभावः अभिभव इति यावत् तं न गच्छतीत्यव्याहते ऐश्वर्ये इति भा
वः कीदृशोऽहं दिशि देवतात्मा हि प्रसिद्धो दिशि जात्यभिप्रायेणैकवचनं सर्वासु दिक्षु देवतावित्स्वादिदेवतात्मा सामान्यास्वरूपं
यद्यपि अविशेषो वा सविशेषो वा ब्राह्मणो मम देवतेति भावः वचनान्मातिमात्रेण दिदेवता त्वं तथापि श्रोत्रपदोपादानाद्यावती वै देव
तास्ताः सर्वा वेदविदि ब्राह्मणे वसन्तीति तस्माद्वेदविद्धोत्रा ब्राह्मणेभ्यो दिवे २ नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणा
तीति अस्त्युक्तं सर्वदेवतास्वरूपत्वं व्यनक्ति तेन च न विद्यया केवलया .... सीमाचलत्वात् उक्तं
कैलाशो हिमवांश्चैव दक्षिणे वर्षपर्वतौ अन्योऽभयावभिव्याप्त सागरान्मानदण्डत्वेनोक्तोवलत्वात् उक्तो लालेकारः अप्रकृतगु
णक्रियाभिसंबंधाद् प्रकृतत्वे नमस्तुतस्य संभावनमुत्प्रेक्षेत्युत्प्रेक्षालंकारः सर्वस्वालंकारः अस्मिन्सर्गे प्रायेणोपजात्युपजातिः क्वचिदिंद्र
वज्रोपेंद्रवज्रे च तल्लक्षणं तु स्यादिंद्रवज्रा यदि तौ जगौ गः उपेंद्रवज्रा जतजास्ततो गौ अनंतरोदीरितलक्ष्मभाजौ पादौ यदी
यावुपजातयस्ता इति १ कुतः परंपरोऽशाभि श्लोकैर्हिमाद्रिं वर्णयति तत्र नगाधिराजत्वं निर्वोढुमाह यमिति सर्वे च ते
शैलाश्च सर्वशैलाः पूर्वकाले कर्तृजरत्पुराणनवकेवलाः समानाधिकरणेनेति समासः यं हिमवंतं वत्सं परिकल्प्य प्र
विधायदोहदक्षे दोहनसमर्थे मेरौ दोग्धरि जाते सति वत्सस्य च भावेन भावलक्षणमिति भावलक्षणे सप्तमी पृथुपदिष्टां पृथुना राज्ञा
वैन्येनोपदिष्टां इदं तथा प्रदर्शितां धरित्रीं गोरूपधारिणीमिति शेषः गोरूपत्वानुवसुंधरेति विष्णुपुराणात् अकल्पितं चेति कि
मेतं भास्वन्ति भास्वंति च भास्वंति युतिमंति ओषधीर्दिशो [illegible] नपुंसके इत्यादिना नपुंसकैकशेषः ॥

रत्नानि मणीन् जातिश्रेष्ठवस्तूनि च रत्नं श्रेष्ठमणावपीति विश्वः जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते इति महौषधीश्च
संजीवनीप्रभृतीश्चरितास्तेन परिणता इति शेषः ताः हीरपरिणामिनीरिति विष्णुपुराणात् दुदुहुः दुहियाच्यादिना द्विकर्मक
त्वं अत्र प्रयोजकत्वे पि शैलानां पंचमिहितैः कर्षति ग्रामं ग्राममन्त्रीरिति वत् तत्समर्थाचरणात्कर्तृत्वेन व्यपदेशः दुहेः स्थिरित्वे पि कर्तृ
मिप्राय विवक्षायां परस्मैपदं अत्रार्थप्रमाणं श्रूयते दुग्धा पुनर्दैत्यैर्वसुधा औषधीश्चैव भास्वति रत्नानि विविधानि च वत्सस्त्वत्र हिमवाना
सीद्दोग्धा मेरुर्महागिरिरिति एतेन वत्सस्य मातुः प्रेमास्पदत्वादस्य सारग्राहित्वं गम्यते तथा च नगस्य रत्नविशेषभाक्त्वं नगाधिराज
त्वे पयुक्तमिति भावः अत्र हिमवद्दोहनस्य प्रस्तुतत्वात् पृथुदोहस्य धीरत्नानां च पयानामप्रस्तुतत्वात्तेषां दोहनक्रियारूपसमानधर्मसंबंधादौ
पम्यस्य गम्यत्वाच्च एवं प्राकारेणिकविषया तुल्ययोगिता नामालंकारः तदुक्तं प्रस्तुतानां तथान्येषां केवले तुल्यधर्मिता ॥
औपम्यं गम्यते यत्र समता तुल्ययोगितेति न चागरूपकपरिणामाद्यलंकारसंकाकार्या तेषामारोप्यमूलत्वात् हिमहिमा
चलादिषु वत्सदोग्धृत्वादीनामारोपसिद्धत्वेनारोप्यमाणत्वादिति ॥ २ ॥ ननु हितो वदयितस्य तस्याप्यतमनभिगम्यत्वात् श्रि
त्रीवइवसकलमपि सौभाग्यमफलमित्यत्राह अनंतेति अनंतरत्नानामिति प्रभवः कारणं अनंतानामपरिमितानां रत्नानां
श्रेष्ठवस्तूनां प्रभवस्य तस्य हिमाद्रेर्हिमं कर्तृभूतं सुभगस्य भावः सौभाग्यं इगन्तलिङ्गं तेन पूर्ववदस्योभयपदवृद्धिः तद्विलोप
नीति सौभाग्यविलोपि सौंदर्यविघातकं न जातं नाभवत् तथाहि एको हि दोषो गुणसन्निपाते गुणसंघाते इंदोः किरणे
ष्वंकेऽपि निमज्जति अंतर्लीयत इत्यर्थः न हि सर्वो दोषश्चित्रवगुणाभिभावक एव किंतु काश्चिदेव कलिकादन्नत्वोरभिभ
यतेऽच अन्यथा समस्तवस्तुहानिप्रसंगादिति भावः अत्रायमानु प्रमितो र्थांतरन्यासोलंकारः नेयं सोऽर्थांतरन्यासो व
स्तुप्रति किंचन सततसाधनसमर्थस्य न्यासो योन्यस्य वस्तुनः इत्यादंडी यश्चेति किं चेति चार्थः यो हिमाद्रिः अप्स

2

रसां विभ्रममंडनानि अलंकरणानि अथवा विभ्रमो विपरीतविन्यासः विभ्रमस्त्वरया काले भूषास्थानविपर्यय इति दशरूप-
केनेन मंडनानि ते यांसि पादयेत्री एतत्रानुरागदर्शिन्यो ऽप्सरसः संध्याभ्रमेण प्रसाधनाय त्वरयंतीति भावः तथा भ्रांतिमदलंकारो ऽपु-
त्पद्यते कर्णकर्मणोः कृतीति कर्मणि षष्ठी वारि वहंतीति वारिवाहाः बलाहकाः मेघाः पृषोदरादित्वात्साधुः तेषां देहे देहबंधे विभक्तोसं-
क्रमितो रागो यया तां तया तोकं स्तेनाडेरंबं कपत्वं गच्छति इदं विशेषणं द्वयं संध्यायामपि योज्यं धातवः सिंदूरगैरिकादयो य-
स्य संतीति धातुमान् नित्ययोगे मतुप् तस्य भावः धातुमत्ता तया तु योगित्वमिति संबंधो वाक्यार्थः समासकृत्तद्धितेषु संबंधा-
नमिति वचनात् लक्षणया तु धातुमित्यानुषंगिणं धातुमित्यर्थः अकालसंध्यामिति नियतकालात्संध्यामिव श्रितवैः अं-
गैर्बिभ्रद्भिः धत्ते अत्र संध्याशब्दस्य जातिवाचित्वान्न्यूनोक्ता ४ पदमिति यस्मिन्नद्रौ किरातास्तुषारस्रुतिभिर्हिमनिस्यं-
दैर्धौतं क्षालितं रक्तं यो गितं पदं स्वतयोक्तं ततो ऽप्रहमिति भावः हतोद्विपानां सिंहानां केसरिणां सिंहानां पदे पादक्षेप-
स्थानं अदृष्ट्वापि नखरंध्रैर्नखश्रेणिभिर्मुक्तैस्त्यक्तैर्मुक्ताफलैर्मार्गं विंदंति जानंति अत्र द्व्यीधा सिंहश्रांति नोगजेंद्राश्च मुक्ता-
कारा इति भावः करींद्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भववेणुजानि मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्यु-
द्भवमेव भूरि ५ ग्रामेस्वलेति सिद्धा अणिमादिसिद्धाः देवयोनिविशेषाः पिशाचो गुह्यकः सिद्धो भूतो ऽमी दे-
वयोनय इत्यमरः ग्रामे स्वलोम्नः ग्रामे स्वलं नितंबवर्यंते मेखलाखड्डुंदे स्यात्कांचीशैलनितंबयोरिति विश्वः ॥
आसन्नयोदामिविध्योरित्यव्ययीभावः संचरतां घनानां मेघानां अधस्सानुनि मेघमंडलादधस्तटानि गताआतपाद्वितीयाश्रि-
तेत्यादिना समासः छायाम नातपं निषेव्य छायामाश्रय छायासत्पश्रियाकांति प्रतिबिंबमनातपमित्यमरः वृष्टिभिरुद्वेजि-
ताः क्लेशिताः संतः उद्वेगत्तिमिते क्लेशेनमेदस्यामिनीतिशद्वाराणिवे यस्य हिमाद्रेरातपवंतिसानतयानि शृंगाणिआश्रयंते

॰प्रतिमेघमंडलमेतस्योन्नत्यमितिभावः न्यस्तेति यत्र हिमाद्रौ धातुरसेन सिंदूरादिद्रवेण गुणोरागेद्रवेरसइत्यमरः न्यस्तात्
रालिखितवर्णाः ॰अनंगवकुंजरशोणाः कुंजरस्यचैवबिंदवः कार्येवयोविशेषभाविनः पद्मंजात्यः पद्मकेजलबिंदुजे
लकमित्यमरात् रक्तानंगवशोणाः रक्तवर्णाः लिखितभागेष्विति शेषः भूर्यत्वचो भुजपत्रत्वचः भुजपत्रोभुजोभूर्जे
तियादवः विद्याधरसुंदरीणां सुरसुंदरीणां लिख्यतेयेष्वितिलेखयत्रिकाः अनंगलेखाः तेषां क्रियया कामव्यंज
कलेखकार्येणेत्यर्थः उपयोगमुपकारं व्रजतीति दिव्यांगनाविहारयोग्योयंशैलइत्याशयः ॰अहमिहस्थितवत्यपित
त्रवसनप्रियामकः लिखितपत्रमनंगरसाकुलविरहिणीप्रहिणोतिप्रियेप्रति ७ यद्गति पोहिमाद्रिः दरीमुखासे
धमुखं तस्मादुत्थेनोत्पन्नेन ॰आतश्चोपसर्गइतिकप्रत्ययः समीरणेन वायुना कीचकावेणुविशेषाः वेणवःकी
चकास्तेस्युर्येस्वनंत्यनिलोद्धताः इत्यमरः तेषांरंध्रभागाञ्छिद्रप्रदेशान्पूरयन्धमयन्नूवोस्मिकोविभुसुखमाह
तेनवंसरंध्राणिपूरयतीतिप्रसिद्धं उक्तास्यतांदेवयोनित्वाद्गुर्वैर्गांधारग्रामेणगानंकरिष्यतो• उक्तंचनारदेन ॥
षड्जमध्यमनामानौ ग्रामौ गायंति मानुषाः न तु गांधारनामानं सचलभ्यो देवयोनिभिरिति किन्नराणां देवगायका
नां तानो नाम स्वरांतरप्रवर्तकोरागः स्थितिप्रवृत्त्यादिहेतुदशापरनामावंशावाद्येसाध्याप्रधानभूतः स्वरविशेषः
तानस्त्वराशोरोमतश्चाभिनगुप्तः ग्रातायेयेस्वरंगच्छेतेनवंशेनतानच्छेदितिभारतः तत्रदानशीलत्वतानप्रदायित्वं
वांशिकत्वंउपगेतुमिच्छतीवेत्युत्प्रेक्षा लालाचदरीमुखोत्थेनेत्येकदेशावर्त्तीगम्यतेचात्रावयविनवंसोकाखोहृपरां
पुच्छनिर्दिष्टोहिमाद्राविन्युलेवकृता ८ कपोलेति यत्र हिमाद्रौ करिभिः करेणुगंडस्थलकंडूविनेतुम
पनेतुं विघट्टितानां कर्षितानां सरलद्रुमाणां देवदारुविशेषाणां संबंधिस्स्रुतानि करिकपोलकषणात्स्रुतानि
क्षीराणिपयांसितेषांभावस्रुतत्वाहेतुनाप्रसृतउत्पन्नोगंधः सानुनिशिखराणिसुरभीकरोति एतेनास्यगर्जनकर

कु॰
३

लंगम्यते तृपागजायुर्वेदे हिमवद्विंध्यमलयोगजानांप्रभवागजाइति ९ वनेचराणामिति यत्रहिमाद्रौ
रजन्यांदर्यः कंदराः स्वगृहास्तेषामुत्संगेषु निषक्ताः संक्रांताः भासो यासांताः औषधयस्तृणज्योतींषि वनि
तानांवाचो वनितासखायोरताहः सखिभ्यष्टजितिटचू तालोरमणाइत्यर्थः वनेचरंतीति वनेचराः कि
राताः चरेष्टइतिटप्रत्ययः तत्पुरुषेकृतिबहुलमित्यलुक् तेषां स्त्रीसहचराणां कांतायुक्तानां स्त्रीपुरुषाणांअ
तैलपूराः अपनेहिताः स्नेहाइत्यर्थः सुरतप्रदीपाभवंति अत्र औषधीष्वारोप्यमाणस्य प्रदीपस्य प्रकृतसुरतोपयोगात्
परिणामालंकारः तदुक्तं आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति तथा प्रदीपकारणतैलपूरणनिषेधात्का
रणकार्याभिव्यक्तिलक्षणा विभावना चेत्युभयसंसृष्टिः १० उद्वेजयंतमिति यत्रहिमाद्रौ शिलीभूतंहिम
यत्र तस्मिन् अतएवांगुलीनां पार्ष्णिभागानां अग्रदेशानां उद्वेजयंत्यपि अतितीव्रत्वात् क्लेशयत्यपि पथि मार्गे श्रोण
यश्च श्रोणिपयोधराः आरोपगतादेकवचनाभावः दुर्भरेण श्रोणिपयोधरेण खिन्नाः पीडिताः अश्वमुख्योद्धतेक्तः ।।
उपसर्गादितिधातोर्विविक्ष्वेः अश्वानांमुखानीवमुखानि यासांताः अश्वमुख्यः किन्नर्यः उपचसमाः स्यात्किन्न
रः किंपुरुषः तुरंगवदनोमयुरित्यमरः मंदांगतिं मंथरगमनं नियंदंति नत्यजंतीत्यर्थः पादपीडाकरेपिदुर्भर
भारभंगुरशरीरैर्नशीघ्रंगंतुंशक्यतइतिभावः ११ दिवाकरादिति योहिमाद्रिः दिवादिवसेभीतंभयाविष्टमि
वउलूकमिवेतिचध्वनि गुहासुलीनंअंधकारंध्वांतं अंधकारोस्त्रियांध्वांतंतमिस्रंतिमिरंतमइत्यमरः दिवादिनंकरो
तीतिदिवाकरात्सूर्यात् दिवाविभेत्यादिनाटप्रत्ययः भीत्रार्थानांभयहेतुरित्युपादानत्वात्पंचमी रक्षतित्रायते ननुक्षु
द्रस्यशरणमनर्हमित्याशंक्याह क्षुद्रेइति उच्चैःशिरसामुन्नतानांशरणंप्रपन्नेक्षुद्रेनीचेपिअतीवसज्जनइवममत्व
ममायमितिस्वाभिमान आलीतिशेषः मूलेममशब्दात्षष्ठीप्रतिपादकादव्ययात् त्वप्रत्ययः अर्थान्तरन्यासोलंकारः ।।

दिवाभीतःचौ
रेघोकपि
लेकुम्भकारो

लोभाद्वेषाद्भयाद्वापि यस्त्यजेच्छरणागतं
ब्रह्महत्यासमंतस्य पापमाहुर्मनीषिणः १

एकतःक्रतवःसर्वेसमाप्तवरदक्षिणाः
एकतोभयभीतस्यप्राणिनःप्राणरक्षणं २

लांगूलविक्षेपेति चमर्यो मृगविशेषाः इत्यतो लांगूलानि वालधयः पुच्छो लूम लांगूले वालहस्तस्तु वालधिरित्य
मरः तेषां विक्षेपैर्धूननैर्विसर्पिण्यः प्रसरणशीलाः शोभाः कान्तयो येषां ते शशांकमरीचय इव गौराः शुभ्राणि तैः गौरः करी
रे सिद्धार्थे शुक्ले पीते पुंसि अरुणे विचेति मालतीमाधवीयं उपमानानि सामान्यवचनैरिति समासः चामरव्यजनैः श्यामरैरिति स्व
हिमाद्रेर्गिरिराजशब्दं गिरिराजसंज्ञामर्थयुक्तमभिधेयवन्तं कुर्वन्ति राज्ञो हि छत्रचामरादि चिह्नानि भवन्तीति भावः १३
यत्रांशुकाक्षेपेति यत्र हिमाद्रौ अंशुकक्षेपेण वस्त्राहरणेन विलज्जितानां किंपुरुषाङ्गनानां किंनरस्त्रीणां यदृच्छया दैवगत्या
दरीगृहद्वारेषु विलंबिनो विलंबमाना नदेत्ताः जलदपंक्तिरस्किरिण्यो जवनिका भवन्ति अन्येषामपि कामिनीनां दिवा सुरतसौ
ख्यमनुभवतां गृहद्वारि विलंबिन्यो जवनिकास्तीर्थे तेषां तासां स्वभावतः एव भवन्तीति पर्वतगुणः प्रतिसीरा जवनि
का स्यात्तिरस्करिणी च सा इत्यमरः तिरसोन्यतरस्यामिति सत्वं जलदश्रेणीरूपमाणा तिरस्करिणीत्वस्य प्रकृतोपयोगि
त्वात्परिणामालंकारः १४ भागीरथीनिर्झरसीकराणामिति भागीरथीनिर्झरसीकराणां गङ्गाप्रवाहपयःकणानां
कंपितदेवदारुः मुहुः पुनः पुनः सद्योवा योनः पुरप्रणयार्थे च सद्योर्थे स्यान्मुहुः पद
मिति वैजयन्ती कंपितदेवदारुः भिन्नानि विश्लेषितानि शिखिनां कलीकृतानि शिखंडिवर्हाणि गलितलापवार्चं किरातक
दिवर्हाणि येन स तथोक्तः क्रमाद्विश्लेषणं अयेन प्रोत्य माघसोरभ्यान्युक्तानि यस्य हिमाद्रेर्वायुर्यद्वायुः अन्विष्टमृ
गैर्मार्गितमृगैः श्रान्तैरिति भावः अन्विष्टं मार्गितं मृगितमित्यमरः किरातैः रासेव्यते १५ सप्तर्षिहस्तावचिति ।।
सप्तचते इस्त यत्राश्च सप्तर्षयः दिक्संख्ये संज्ञायामिति समासः तेषां हस्तैरवचितेभ्योऽवशिष्टानि अवशिष्टा
नि नतु सन्नीलोत्पलकलिका मेने महान् दोषो विद्यते यदुक्तं कुड्मलेनार्चयेद्देवं शिवमाल्येन लंघयेत् सत्यं पंकजान्यपि
त्रिविधानि विकसितः संकुचिता निश्रमिश्रमवाविकस्वराणि नवीनकलिकाश्च अयते सविकाशाव्यक्तिं उक्तं च ।।
पुराणान्यहरणः प्रातर्मध्यमानि च भास्करः नवीनान्यंभोजानां विकाशो मेव जायते मुनयोपि द्विविधा उदित्या

५

जितो ऽनुदितया जिनश्च ऽतेन ते ऽनुदितया जिता मुनयो ऽग्रहस्तेन विकासितानि यस्मात् विकमलान्याददाना न पुनः कलिकाऽ
त्यर्थी पुरा हि स्मा विकमलानां त्रैविध्यमुक्तं विकसितं कुंचितं पुनर्विकस्वरे यत्पुंजे कुड्मलं स्त्रियाः कलिका कथ्यते नूतन
विकासिनी मधुलिहामर्थः शोभोप्रधानेनेतास्थेऽत्रि सप्तर्षयो युक्तः कर्मणि घञ्‌ल्यपः अग्रेण पद्मानां साकल्ये स
चितं यस्य हिमाद्रेः हरंतीति हराणि इत्युपधलक्षणः कप्रत्ययः अग्रे उपरि यानि सरांसि तेषु रुहाणि निरूढानि अधः
परिवर्तमानो भ्रमन् विवस्वान् सूर्यः ऊर्ध्वमुखैर्मयूखैः प्रबोधयति विकासयति न कदाचिदधोमुखैः अतिमार्तंडमंडलतु
दयमहमेरिति भावः १६ यज्ञांगेति यज्ञांगानां यज्ञसाधनानां सोमलताकुशपलाशादीनां योनिः प्रभवस्तस्य भावस्त
त्वं उक्तं यज्ञांगार्थमवसृष्टो हिमवानचलेश्वरः इति चकारान्न केवलं यज्ञांगयोनित्वं अवेक्ष्य धरित्रीधरणक्षमं
धारणायोग्यं सारं बलं च शरीरबले स्थिरांशे चेत्यमरः अवेक्ष्य ज्ञात्वा प्रजापतिः स्वयमेव कल्पितो ऽस्य व्यवस्थापितो यज्ञभा
गो यस्मिन् तत्तथोक्तं शैलानामाधिपत्यं अधिपतित्वं पत्यंतपुरोहितादिभ्यो यगिति यक्प्रत्ययः अन्वतिष्ठद्दत्तवानित्यर्थः
उक्तं च ब्रह्मांडे शैलानां हिमवंतं च नदीनामथ सागरं गंधर्वाणामधिपतिं चित्ररथं विदुरिति १७ कुलस्येति ॥
समानसीमिति संप्रति कन्याप्रसोति सइति मेरोः सखा मेरुसखः बंधुसंपन्न इति भावः स्थितिज्ञः मर्यादाभिज्ञः
श्रितसंपत्तिरनेन सूच्यते स हिमवान् पितॄणां मानसीं संकल्पजन्यां कन्यां मुनीनामपि माननीयां योगब्रह्मवादाभ्यां
पूज्यामित्यर्थः उक्तं च विष्णुपुराणे तेभ्यः स्वधा सुते जज्ञे मेना वैतरणी तथा ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे
द्विजोत्तम इति आत्मानुरूपां कुलशीलसौन्दर्यादिभिः सदृशीं मेनां मेनकां देवीं कुलस्य स्थितये वंशस्योद्धरणाय प्रतिष्ठाये
न तु केवलं भोगाय विधिना शास्त्रेण उपयेमे परिणीतवान् ययोरेव समं वित्तं ययोरेव समं कुलं तयोर्मैत्री विवाहश्च न तु
पुष्टविपुष्टयोः उपाधर्मः स्वकारणं इत्यात्मनेपदं तेनैव मानसी कन्या मेना नाम महागिरेः पत्नी हिमवतो यस्याः पुत्रो
मैनाक उच्यत इति ब्रह्मांडपुराणे १८ कालक्रमेणेति कालक्रमेण गच्छता कालेनेत्यर्थः तयोर्मेनाहिमवतोः स्वरूपयो

गेसौंदर्यानुगुणे अथवा रूप्यं तेऽनेनेति रूपं ज्ञानं तयोर्योग्ये शास्त्रानुसारिणीत्यर्थः उक्तं च कांतामनोरमं चैव जठरं जठ
रेन या चतुर्धा यौवनं ज्ञेयं कामशास्त्रविशारदैः षोडशाभिर्वर्षैरेकं यौवनं कांतेयानवंशो मनोरमं भवति पुष्टदेहबलः जठरे
क्षिभक्तमात्रः स्वल्पांगबलश्च जाठरे नियतमिति १८ असूतेति सा मेना नागवधूपभोग्यं नागकन्यापरिणेतारमित्यर्थः अंभो
निधिसंख्यं कृतमैत्रेकसख्यं सूचयन्नाह पक्षच्छिदि पक्षच्छेत्तरि सत्सु देवेन्द्रादिनाक्लिष्टे वृत्रशत्रौ शक्रे क्रुद्धे कुपिते सत्यपि
कुलिशक्षतानां वज्रप्रहाराणां संबंधे षष्ठी वेदनां जानातीति वेदनाज्ञः अतोऽनुपसर्गे कः उपपदमतिङिति समासः सम
भवतीत्यवेदनाज्ञः तं कुलिशक्षतवेदनानभिज्ञमित्यर्थः सापेक्षत्वेपि गमकत्वात्समासः पक्षच्छेदोद्यतः शक्रः त्राणाय
शरणागमनायानयोः सख्यमुत्तलमिति भावः सर्वपर्वतपक्षच्छेदे स्वयमनुद्विग्नं चेति मैनाकस्योत्कर्षः तादृक्पुत्रवती हिमाद्रि
रिति सार्थकं मेनाकस्य वर्णनं यस्मात्तु न भवेत् नानविनायते वाधिता न योपद्वलेतनोप्राज्ञः पुत्रिकासंकथेति अथात्काय
दिशायनन निषेधात्स्वावत्याभ्रात्मतीत्वं दर्शितमिति २० अथेति अथ मेनाकजन्मानंतरं दक्षस्य दक्षप्रजापतेः कन्या भवस्य
हरस्य पूर्वपत्नी पूर्वभार्या सती नाम्नी पुनः कथं भूता सती पतिव्रता सती साध्वी पतिव्रते त्यमरः सती नाम देवी पितुर्दक्षस्य रोषात्
कर्तरि षष्ठी अपमानेन स्वभर्तुरवज्ञया प्रकोपिता योगेन योगमार्गेण विसृष्टदेहा त्यक्तदेहा सती जन्मने पुनरुद्भवाय शैलव
धूं मेनां प्रपेदे अत्र पुरा देवी दक्षाध्वरे सर्वेषु कश्यपादिजामातृषु निमंत्रितेषु सत्सु यदैव सा महादेवसहिता नागतान्त तस्य
भर्तुरवज्ञामसहमाना हूयमानमानसया किं मे तेन ममदेहेना विवेकिजातिर्जन्मलेन पित्रा प्रयोजनं भवांतरे पिनवीभूतोऽमे
भयादिति अभिधाय तत्र सदः समेत्य ज्वाज्वल्यमानज्वालाकरालकुंडे देहोत्सर्गं विधायि स्वसतीरं योगाग्निना ददाहेति क
थानुसंधेया २१ असंधराणामिति भव्या कल्याणी सा दक्षस्य कन्या सती भूधराणामधिपेन हिमवता समाधिमत्यां निय
मवत्यां आकाशे चाशयनं मात्समंडलेषु प्रवेशनं समुद्गामिनीशरदवलंघनं चतुः पश्चाग्निपथ्य दर्शनं इत्यादि योग्याऽस्यत्यर्थः
नियमविशेषः स समाधिर्नाम समाधे विद्यते यस्याः सा तस्यां मेनकायां सम्यक्प्रयोगात्साधाचरणाद्धेतोः अचरिताया अभ्र

शायां नीतौ उत्साहगुणेनोत्साहशक्त्या कर्त्री संपद्विवोऽपादि उत्पादिता पद्यतेः कर्मणि लुङ् चिण् भावे कर्मणोरिति
चिण्प्रत्ययः चिणो लुगिति लुक् २२ प्रसन्नादिति प्रसन्नानि निर्मलानि दिग्यत्र तत् प्रसन्नदिक् अहरजो वृष्टिभिर्मुक्तं पांशुप
घातरहिता पांशुभिर्विभक्ता रजोभिः रहिता वाता वायवो यस्मिंस्तत्तथोक्तं सेवनीयता: स्वनस्य बाह्यान्तरं यथा भवति त
थापुष्याणां रहितं यस्मिंस्तत्तथोक्तं तस्याः पार्वत्या जन्मदिनं तज्जन्मदिनं स्थितिशीला: स्थावरा वृक्षादयस्तेभ्यस्तेषां स्थे
शुभाशेत्यादिना वरच् प्रत्ययः जंगमं तेभ्यो गच्छतीति जंगमा देवदेवतिर्यङ्मनुष्यादयः गमेर्यङन्तात्पचाद्यच् ॥
स्थावराश्च जंगमाश्च स्थावरजंगमास्तेषां स्थावरजंगमानां देहधारिणां शरीरिणां सुखोदयाय नेदाय यभव यदुक्तं ॥
वानरहताश्च जीवाश्च यस्मिन्नजाते नन्दुर्जनैः पीड्यंते सततं तस्या जीवितं सकलं भुवि २३ तयादुहितेति स्फुरत्प्रभाम
ण्डलया तया दुहित्रा सवित्री जनयित्री मेनात्यरतिस्त नीत्यादिनाऽऽगमः विदूरस्याद्रेः प्रांतभूमिर्वैदूर्यभूमिः म
णिमया भूमिः विदूरे विदूरस्य गिरेः नूतनमेघरोधसः शलाकाकलकसीमां तेभवोत्सस्य करोद्भवेदिति वुञ् नवमेघशब्दोद्भि
न्नयारत्नशलाकया रत्नांकुरेण वसुतरां चकासे तत्र हि नवजलधरगर्जिते तद्वीलाविद्भिन्नी धूमाणि द्वयाणि घातशोरत्नजात
यः समुत्पद्यंते २४ दिनेदिनेति लब्धउदयो यया सा लब्धोदया उत्पन्नेत्यर्थः प्रभृतितेत्यन्वयः दिनेदिने प्रतिदिनं नित्य
वीप्सयोरिति वीप्सायां द्विरुक्तिः परिववृधे आप्याय समा नामैतत् सा बाला चांद्रमसद्र्यंचांद्रमसी लेखा कला कलांतरा
णीव लावण्यमयान् कांतिविशेषान् पुष्णात् पुष्णाति कलेपुष्पाद्यायातलेपमिवांतरा प्रतिभाति मदंगेषु तल्लावण्यमिहोच्यते
इति भूपालः विशेषानवयवान् विशेषोवयवे व्यक्तौ इत्युत्पलमालायां ज्योत्स्नाधामंतरे अंतर्द्धीनेमे धातानि ज्योत्स्नांतरा
णि ज्योत्स्नायाः अंतर्हितानि श्रावतानि तन्मध्यानीति यावत् अन्याः कलाः कलांतराणि वसुमच्चेति समासः स्वानात्मी
यान्यतादर्थ्ये रघ्रांतद्धि पुष्यांतरमित्युभयत्रापि सात्वतः पुष्टोप उपचितवती सेयमनेकेव शब्दवाक्यार्थोपमेत्याहदंडी वाक्या
र्थेनैव वाक्यार्थः कोपि यद्युपमीयते एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधेति २५ तोयार्द्रतीति बंधुवाक्यार्थोपमेत्याहदंडी

॰वाक्यार्थेनैव वाक्यार्थः कोपि यद्युपमीयते एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधेति बंधुप्रियां तां बालां बंधुजनः पित्रादिराभिजनेना
दाग्गतेन आभिजनेन पित्रादिपूर्वबंधुसंबंधोपाधिकेनेत्यर्थः अभिजनात्पूर्वबांधवा इति काशिकायां नाम्ना पर्वतस्यापत्यं स्त्री पार्वतीत
स्यापत्यमित्यण्प्रत्ययः इति जुहाव आहूतवान् ह्वयतेर्लिट् पर्वतजन्मत्वोपाधिना पार्वतीनाम जगामेत्यर्थः पश्चादाभिजननामप्र
वृत्त्यनंतरं मात्रा जनन्या उ इति संबोधने उ इति वितर्के संबोधने पादपूरणेपीति गणव्याख्याने मा इति निवारणे उमेति अपि वत्से मा कुर्व
त्येवंरूपेण तपसस्तपश्चर्यातः वारणानामीप्सित इत्यपादानत्वात्पंचमी निषिद्धा वारिता सती सा बाला उमेत्याख्यं नामधेयं उमाख्यं
जगाम २६ महीभृत इति पुत्राश्च दुहितरश्च पुत्राः भ्रातृपुत्रौ स्वसृदुहितृभ्यामित्येकशेषः ते अस्य संतीति पुत्रवान् भूमार्थे मतुप्
तस्य पुत्रवतोपि बहुपत्यस्यापीत्यर्थः महीभृतो हिमाद्रेर्दृष्टिश्चक्षुस्तस्मिन्नपत्ये त्यत्यके आदुर्हितरं सर्वेष्वपत्येष्वेकं तपोसमेत्य
मरः तस्यां पार्वत्यामित्यर्थः तृप्तिं न जगाम तर्हि निरपत्यो भविष्यतीत्याह पुत्रवतोपि तथाहि अनंतपुष्पस्य नानाविध
कुसुमस्यापि मधोर्वसंतस्य संबंधिनी द्विरेफमाला भृंगमाला चूतस्य विकारे चूते चूतस्य कुसुमे अवयवे च प्राण्योषधिवृक्षे
भ्य इति विकारार्थे उत्पन्नस्य मयटः पुष्पमूलेषु बहुलमिति निर्वचनाल्लुप् सविशेषः सातिशयः संगो यस्याः
सातत्पोक्ता भवति अत्याशक्तेत्यर्थः २७ प्रभेति प्रभा महत्या प्रकाशाधिकया शिखया ज्वालया दीप इव पूतः च विभूषितः
शिखा दीपयोश्च एकवाचि भावात् हृदेन व्यपदेशः त्रयो मार्गा यस्यास्तया त्रिमार्गया गंगया मंदाकिन्या तृतीया द्यौर्लोकस्त्रि
दिवः स्वर्गः पूतः च पुनः विभूषितः स्वर्गे त्रिविष्टपे त्रिदिवस्य त्रिभागवत्यामालोचते ल दीव्यतेश्च घजर्थे कविधानं दीव्यत्य
गेत्यर्थः इति क्षीरस्वामी तस्य मार्गः स्वसंस्कारो व्याकरणजन्या शुद्धिः तद्वत्या गिरा वाचा भईर्वाललक्ष्मीर्निहता पिबा वीति श्रुते
रितिभावः मनसईषी मनीषी विद्वानिव पूतः विभूषितः पृषोदरादित्वात्साधुः तया पार्वत्या स हिमवान्पूतः शोधितश्च भू
षितश्च अत्र शिखा त्रिमार्गा गिरां भगानां नहित्वान्न विशेषणाधिक्यदोषः इयं मालोपमेति २८ मंदाकिनीति सा पार्वती बा
ल्ये वयसि क्रीडानां रसः स्वादो रुचिरिति यावत् इयं क्रीडारसे रसो गंधरसे स्वाद इति विश्वः निर्विशतीति भुंजानेव निर्वि

१०९
६

शोभनतिभोगयोरित्यमरः आदीर्नद्योर्नुम इति नुमागमाभावः सखीनां मध्यगता सती मंदाकिन्यां सैकते षु वेदिकाभिः कंदुकैः
कृत्रिमक्रियया निर्वृत्तैः ड्वितः क्त्रिरिति क्त्रिप्रत्ययः क्त्रेर्मम् नित्यमिति मुमागमः अथ पुत्रकैः पंचालिकाभिः पंचालिकापुत्रि
कास्याद्वस्त्रदंतादिभिः कृतेत्यमरः संज्ञायां कन्निति कन्प्रत्ययः मुहुः रेमे २९ तामिति स्थिरः स्थायी उपदेशः प्राग्भवी
यो यस्यां तां गृहस्थे शिक्षाकरीं तामित्यर्थः तां पार्वतीमुपदेशकाले पठनसमये प्रपेदिरे सर्वविद्या जन्मान्तरविद्याः पूर्वजन्माभ्यस्तविद्या
इत्यर्थः का इव शरदि गंगां हंसमाला इव यथा हंसमाला शरत्काले गंगां प्राप्नुवंति नक्तं रात्रौ महौषधिलता विशेषं आत्म
भासः स्वदीप्तय इव प्रपेदिरे उपमानसामर्थ्यात् उपदेशेतरेणैवेति गम्यते प्रतिजन्म यदभ्यस्तं ज्ञानमध्ययनं तपः तेनैवाभ्या
सयोगेन तद्देवाभ्यसते पुनरिति ३० असंभृतमिति अथ विद्याप्राप्तेरनंतरं सा पार्वती अंगयष्टेः शरीरलतायाः असंभृतं
अयत्नसिद्धं मंडनं प्रसाधनं अपरं किंलक्षणं यौवनं वयः अनासवाख्यं चानन्यतिरिक्तमदस्य चेतोविकारस्य जननं करणं आस
वाख्यरहितमनासवाख्यं मदस्य कारणं साधनं कामस्य पुष्पव्यतिरिक्तमस्त्रं अतेवाल्यात् शैसवात् परमितरं भावं यौवनं प्रपेदे प्राप यौव
नेनैव हि युवतयः प्रसाध्यंते ऽसुसंति माद्यंति विकारमयंते चेति भावः अत्र द्वितीयपादे आसवरूपकारणाभावेऽपि तत्कार्यमदो
क्तेर्विभावनालंकारः तदुक्तं कारणाभावे कार्यस्योत्पत्तिर्विभावनेति प्रथमतृतीयपादयोस्तु तल्लक्षणाभावाद्यौवनेऽप्यारोप्यमाणयोर्मंड
नमदनास्त्रत्वयोः प्रकृतोपयोगित्वात् परिणामाख्यो लंकारः सर्वस्वालंकारः तल्लक्षणं तूक्तं ३१ उन्मीलितमिति नवयौवनेन प्रथमयौ
वनेनाविभक्तं अभिव्यंजितं स्तनजघनादिसंस्थानं अभिस्यर्थः तस्याः पार्वत्याः वपुः तूलिकया कूर्चिकया शलाकयेत्यर्थः तूलि
का कूर्चिका लेख्यरूपचिकायां तलशाययोरिति विश्वः उन्मीलितं जनानव्येण प्रकाशितं समुत्कीर्णमिति यावत् उन्मीलितं समुत्कीर्णमि
ति विश्वः चित्रमालेख्यमिव पुनः कमिव सूर्यांशुभिर्भिन्नं विकासितं अरविंदमिव चतस्रोऽस्रयोऽस्यत चतुरस्रं सस्पगात समुत्थेत्यादि
ना अच्प्रत्ययांतो निपातः चतुरस्रं सर्वतोरणमयीमन्यूनातिरिक्तं यथा तथा शोभते स्म ताद्धील्ये नेति चतुरस्रेण शोभितं भूतं ताद्धील्ये णिनिः ॥
चतुरस्रशोभि भिन्नाहवानमनः चित्रारविंदयोः तूलिका अरविंदस्य तरणिकिरणसंबंध इव तस्य तनः सिद्धस्य वांगसौष्ठवस्य यौवनप्रादुर्भावो मिथः

राम
६

जकोव भवेति भावः ३२ अभ्युन्नताम् इति संप्रति सप्तदशभिः श्लोकैरस्याः पादादिकेशान्तवर्णनमारभते अभ्युन्नतयोः अंगुष्ठन
खयोः प्रभाभिर्निक्षिप्तेन निलेपरागनिर्भरस्याखाद्धेतोः रागमन्तर्गतं लोहित्यं रागः क्लेशादिके रक्तो मात्सर्ये लोहितादिषु इति शाश्वतः ३
क्षिरन्तीव मेनाविवव हिर्निःसारयन्ताविवस्थितावित्यर्थः अत्रोत्क्षिरन्तौ गौणार्थत्वान्न ग्राम्यतादोषः प्रस्तुतगुणरुप्रवर्यपादद्वन्द्वं विलुठन्तो
सौरीणांनादितोणरुत्रिपादाश्रयं अनतिलुंदाम्नयन्यग्राम्यकतो विग्रहतइति तस्याश्चरणे तत्रेरणे प्रक्षिप्या मध्यस्या यकअवस्था
नरहितौ सेवां चारित्रीमित्यर्थः स्थलारविंदश्रियमाजहतुः स्थलविशेषणान्निपतलौहित्यलाभः अत्रसामुद्रिकाः यस्यारक्ततलौ पाद
वुन्नताग्रतलस्पृशौ निगूढगुल्फौ निहतौ सास्याद्भूपतिसंमतेति अत्रोपमानधर्मस्य स्थलारविंदश्रियश्चरणयोरुपमेययोरभावाद
विंदश्रियमिवाश्रियमिति करणात्वा निदर्शनालंकारः तदुक्तं असंभवद्धर्मयोरुपमानोपमेययोः प्रतिबिंबक्रियागम्या यत्र सास्या
न्निदर्शनेति साच संबंधे असंबंधलक्षणातिशयोक्त्यानुप्राणिता अथवस्या मित्यनेन स्थलारविंदस्य श्रियः संबंधेप्य संबंधात् ३३
सारानेति प्रस्तुपदेशालुब्धोः अथवा विधयाविधेतिन्यायादितिभावः तदेवव्यनक्ति नूपुरसिंजितान्यादिस्यमिवादातुमिव
भिः संजितं मंजुकूजितेः पदेशमिच्छुभिरित्यर्थः राजहंसैः सन्नतांगीकुचभारादितिभावः सापार्वतीलीलाभिर्विलासैः रचिताः शिंजिताः
विभ्रमाः पादन्यासा येषु तेषु अंचेचे शिंजितायामितीज्ञगमः लीलाविलासक्रिययोरित्यमरः गतेषु विषयेष्वनीयते च विनीता
किमु अन्यथा कथमस्माहंसगतिरितुत्प्रेक्षा ३४ वृत्तानुपूर्वेइति वृत्ते वर्तुले एवं मनुगते अनुपूर्वे गोपुच्छाकारे इत्यर्थः वृत्ते
चते पूर्वे च वृत्तानुपूर्वे नातिदीर्घे अनतिदीर्घे महाविभाषया नञ्समासाभावः नञः कारकविशेषणं प्रयोगादवसेयं शुभे मंगलेनस्याः
जंघे नदीर्घे जंघप्रसृते जंघानुप्रसृतान्यान्वित्यमरः एव एवं तो निर्मितवतः विन्यस्य कु शोवागविनिर्माणविधौ विषये जंघातिरिक्तावयवनि
र्माणार्थमित्यर्थः उत्पाद्य पुनः संपाद्य लावण्यं कांतिविशेषविषये लावण्यलक्षणमुक्तं यत्नश्रासेवव भूवकिमित्युत्प्रे
क्षा उपादानं मंतरेण कार्यस्य दुःकरत्वाद्विशेषेदृग्गानां चलावण्ये पादानकत्वोत्सर्वसंचितस्य जंघार्थमेवकारत्वेन च विनियोगात्
पुनर्लावण्यसंपादनेयत्नः स्यादित्यर्थः तादृक्सौंदर्ये तत्संघेदितिभावः आसेतिवभूवार्थे तिङ्न्तप्रतिरूपकमव्ययमिति शाक
टायनः वभूवमत्तुनतिङ् तप्रतिरूपकं आसेत्ये तिश्वादेशानियमात् तादृक्तिङ् तस्यैवभावात् किंतु कवीनामयं प्रामादिकः ॥

कुं० टी०
७

प्रयोग इत्याह वामनः ॥ असंगतिरीप्सादानेप्सितस्य धातोरिदं लिङि रूपमित्याह आसेत्यस्येरितितदोनी मासेति दीर्घपर्यासादिदी
पेप्ररत्न इत्यर्थः ३५ नागेंद्रेति नागेंद्राणामैरावतादीनां हस्ताः कराः त्वचि चर्मणि कर्कशत्वात् कदलीविशेषा राजरंभा कृपः एकां
तशैत्यान्नियतशैत्याद्धेतोः लोके परिणाहादिवैपुल्यवंतं रूपं लब्ध्वापि अपिशब्दात् करिकदलीविशेषमात्रस्य तादृक्परिणा
होपि नास्तीति भावः तस्याः ऊर्वोस्तद्वौरुपमानं बाह्यायाता उपमानक्रियानहींनवर्त्तेतुः तद्वौ नैकांतकल्पेनाप्येको तशैत्य
मिति भावः ३६ एतावतेति अनिंदितायाः अनवद्यायास्तस्याः कांचीगुणस्थानं नितंबबिंबं एतावता ननु एतावतैव प्रश्नावधार
णानुज्ञाननुनयामंत्रणे ननु इत्यमरः शोभत इति शोभि आवश्यके णिनिः ततस्तत्पुरुषः अनुमेयं शोभा यस्य तदनुमेयशोभि
लघ्वत्यपत्तुगतार्थत्वेन प्रयुक्तं इत्याह वामनः पञ्चपादे नपुंसकेपि पञ्चम्यात्मयश्चर्यानंतरमित्यर्थः गिरौ शेते इति गिरिशः शिवः
गिरौ डः सप्तम्यामिति डप्रत्ययः भाषायामपि क्वचिदिष्यते अथवा गिरिः कैलाशोस्यास्तीति गिरिशः लोमादित्वाच्छप्रत्ययः
तेन गिरिशेनानन्यासा नारीणां कमनीयः कामयितुं शक्यो न भवतीत्यनन्यनारीकमनीयः तमंकं निजोत्संगं आरोपितं अधिरोपित
मितियावत् एतावतालिंगनेनेति सर्वेणान्वयः रोहितेर्यंतात्कर्मणि क्तः रुहः पोन्यतरस्यामिति पकारः गत्यर्थविवक्षायां हि कर्म
त्वं प्रधाने कर्मणि क्तः गिरिजानितंबबिंबातिशायिसौंदर्या गिरिशारूढनितंबबिंबत्वात् व्यतिरेकेणान्यनारीनितंबबिंब
वत् विपक्षे हेतुः विभर्तिवाधिकांतातिशायिशोभनितंबबिंबस्य तु पक्षसपक्षयोरन्यतरभावी नौनित्यनिष्कलंकमनुमा
नमिति ध्वनिमितिनसंरंभेण ३७ तस्या इति नीवीवस्त्रग्रंथिं स्त्रीकटीवस्त्रबंधेपि नीवी परिपणेपि चेत्यमरः आति
क्रम्य अतीत्य नतां नम्रं नाभिरंध्रं प्रविष्टा तन्वी सूक्ष्मा तस्याः पार्वत्या नवरोमराजिः सितेतरस्यासितस्येंद्रनीलस्येत्यर्थः त
स्यां पार्वत्यां मेखलांतिमेखला तस्या इत्यनुवृत्तेः पुनर्वृत्तेः पुनस्तच्छब्दो वाक्यांतरत्वात् सोढव्यः यद्वा तस्या नीव्या मेख
लातत्रतदत्रस्थानात् तस्या मध्यमणेः अर्चिः प्रभेव रराज अज्वाला भासो नपुंस्यर्चिरित्यमरः ३८ गंभीरनाभीति विशेषकः मध्येन
सेति वेदिः परिष्कृता भूमिरित्यमरः वेदिरिव विलग्नं मध्यात्तनुमध्या सा बाला पार्वती मध्येन मध्यभागेन चारु हृद्यं वलि
त्रयं कामस्यारोहणार्थं नवसोपानेन प्रयुक्तं रचितं सोपानमिव बभारेत्युत्प्रेक्षा ३९ अन्योन्यमिति अन्योन्यं परस्परं कमिव्य

राम
७

त्तिहारे सर्वनाम्नो द्विर्भवत इति वक्तव्याद्विरुक्तिः समासवच्च बहुलमिति बहुवचनाद् समासपक्षे पूर्वपदस्य प्रथमैकवचनं उत्पी
डयन्नुत्पसंधयन् पांडुगोरं पीवरमित्यर्थः उत्पलाक्ष्याः तस्याः स्तनद्वयं तथा तेन प्रकारेण प्रवृद्धं कर्तृरिक्तः श्यामसुखस्य स्तनच
चुकस्येति स्वरूपवर्णनं स्तनद्वयस्य यथा येन प्रकारेण मृणालसूत्रान्तरं विसतंतुमात्रमवकाशोपि अलभ्ये लब्धुमशक्यं अंतर
मवकाशावधीत्यमरः अत्र संबंधेप्यसंबंधप्रतिपादनादिति ४० लोके सुकुमारतमस्य कुसुममात्रस्य साधकतमत्वमिति स्थितेऽन्या
ह शिरीषेति तस्याः इमौ तदीयौ बाहू शिरीषपुष्पाधिकं सौकुमार्यं यमादेवं ययोस्तौ तथोक्ताविति मे वितर्कः ऊहः कुतः
यौ बाहू पराजितेनापि पूर्वं निर्जितेनापि मकरध्वजेन कामेन हरस्य कंठपाशौ कंठबंधनरज्जू कृतौ कंठालिंगनसाधितावित्यर्थः
तद्साध्यसाधनादाधिक्यमिति भावः अत्र बाहावारोपितकंठपाशत्वस्य प्रकृतवैराग्निर्जितत्वोपयोगात्परिणामालंकारः ४१
निर्भर्त्सितानाशोकेति लेपकः कंठस्येति तस्याः स्तनाभ्यां बंधुरस्योन्नतस्य कंठस्य निस्तलस्य वर्तुलस्य मुक्ताकलापस्य मुक्ताभ्
यणस्य च वर्तुले निस्तले वृत्तं बंधुरं त्वन्नतानतमित्यमरः कलापो भूषणे बर्हे इत्यमरः अन्योन्यस्य शोभाजननात् भूषणभू
ष्यभावः अलंकार्यालंकारकभावः साधारणः समानो बभूव उभावप्यन्योन्यं भूष्याभूषकौ बभूवतुरित्यर्थः अत्र कंठमुक्ताक
लापयोः शोभाक्रियाद्वारेणान्योन्यजनकत्वात् अन्योन्यालंकारः तदुक्तं परस्परक्रियाजननेऽन्योन्यामिति ४२ इतलीया
वेतीवदने चंद्रकमलसदृशमित्येतदेव वस्तुभंगेनाह चंद्रमिति लोला चपला परिभ्रमणशीलेत्यर्थः लक्ष्मीः कांतिः सा मानि
नी देवता चंद्रं गता प्राप्ता सती पद्मगुणान् सौगंध्यादीन् न भुंक्ते नानुभवति पद्माश्रिता सती चांद्रमसीं चांद्रमसीमभिख्यां
शोभां अभिख्या नामशोभयोरित्यमरः उमामुखं प्रतिपद्य तु द्वौ चंद्रपद्मे संश्रयः कारणे यस्याः सा द्विसंश्रया तां प्रीतिमानंद
मवाप तत्रोभयगुणसंभावादिति भावः अत्र उपमानभूतचंद्रपद्माभ्यां उपमेयस्योमामुखस्याधिकरणत्वोक्तव्यति
रेकालंकारः तदुक्तं भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेक इति ४२ पुष्पमिति पुष्पं पुंडरीका
दिकं प्रवाले पल्लवे उपहितं निहितं स्याद्यदि प्रवालो वल्लकीदंडे विद्रुमे न नवपल्लवे इति विश्वः मुक्ताफलं वा स्फुटे निर्मले वि
द्रुमे निविष्टं स्थितं स्फुटविद्रुमस्थं स्याद्यदि ततस्तर्हि विशदस्य शुभ्रस्य ताम्रे अधरोष्ठे पर्यस्ता प्रसृता रुक्कांतिर्यस्य तस्य
तथोक्ते तस्याः पार्वत्याः स्मितस्यानुकुर्यात् स्मितमनुकुर्यादित्यर्थः माषाणामश्नीयादिति शेषसंबंधमात्रविवक्षायां षष्ठी

१०८१०
८

अत्र पुष्पप्रवालयोर्मुक्ताविद्रुमयोश्चासंबंधातिशयोक्तिः साच संभावनयेत्यलंकारसर्वस्वलंकारः सा विशेषणस्तु पुष्पमुक्ता
फलयोरुपमानयोः प्रकृतोष्ठधार्यस्मुपमेयताकल्पनान्प्रतीयालंकारः सच पूर्वोक्तातिशयोक्त्यनुप्राणितेइति उपमा
नस्य पक्षे उपमेयताकल्पनेवाऽप्रतीयमिति तिलकल ४४ स्वरेणेति अभिजातवाचि मधुरभाषिण्यां तस्यां पार्वत्याममृत
स्रुता अमृतस्राविणा क्विप् स्वरेण नादेन प्रजल्पितायां आलपत्यां कलोक्तेः अन्यैः काकादिभिः पुष्टा अन्यपुष्टा कोकि
लाः विमुखस्ययाद्व्या जातिवतनयाभावंगीवभावः ताड्यमाना वाद्यमाना विषमबद्धा वितंत्रीरिव अविततस्तंतस्भ्यः
इदितितुविभावनेत्रीधामोरोरेणादिकइत्यत्रः शाङ्र्भावान्तठल्पादिलोपः तदुक्तं अवीलक्ष्मीतरीतंत्रीह्रीधीश्रीणा
मुणादितः स्त्रीलिंगानामम्यीयातुसुलोपो न कदाचनेति संग्रहः एतेऽप्यनतानभवंतीत्यर्थः श्रोतुर्जनस्य प्रतिकूलशब्दाकर्णि
नेऽनादरो भवतीति शेषः ४५ प्रवातेति प्रवाते प्रभूतवाते तस्थले यन्नीलोत्पलं तेन तो निर्विशेषं निर्भेदं तत्सदृशमित्य
र्थः अधीरविप्रेक्षितं चकितविलोकनं आयताक्ष्या विशालनेत्रया तया पार्वत्या मृगांगनाभ्यो हरिणीभ्यो गृहीतमभ्यस्तं
अथवा मृगांगनाभिस्ततस्तस्याः पार्वत्याः पंचम्यास्तसिलागृहीतं नुमग्रोन्न क्षिप्तस्य परस्परग्रहेणोक्ते तण्णा तुल्यमेतेति केचित् ॥
तदुपत्तौ विसंदेहसंदेहालंकारः इत्यन्ये उभयोस्संकर इत्यपरे ४६ तस्या इति आयतरेखयोर्दीर्घरेखयोस्तस्याः पार्वत्याः
भ्रुवोः संबंधिनी शलाकयाञ्जनेन निर्मितेव स्थिता याः कांति लीलाचतुरां विलाससुभगां तां कांतिं वीक्ष्यानंगः स्व
चापसौंदर्येणमदः मदस्तं मुमोचेति सौंदर्यातिशयोक्तिः ४७ लज्जेति तिरश्चां तिर्यग्जातीनां चेतसि लज्जास्याद्य
दि संशयस्याभावः असंशयं संदेहो नास्तीत्यर्थः पर्वतराजपुत्र्याः पार्वत्याः शाङ्गरवादिपाठात्पुत्रशब्दात् ङीष् तं प्र
सिद्धं केशपाशं केशकलापं पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः प्रसमीक्ष्य दृष्ट्वा चमर्यो मृगीवि
शेषाः वालाः प्रिया यासां ता इति विग्रहः वालप्रियत्वं प्रियवालत्वं वालप्रियस्येति परनिपातः स्वतलोर्गुणवचन
स्येति पक्षे पुंवद्भावः शिथिलं कुर्युः विलज्जत्वात् शिथिलयंतीत्यर्थः अन्तरुपाजनिर्लज्जत्वस्य शिथिली
करणहेतोराद्यपादे वाक्यार्थत्वेनोक्त्या काव्यलिंगाख्यालंकारः तदुक्तं हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति
४८ सर्वेति किंबहुना सा पार्वती विश्वसृजा विधात्रा एकत्रनिष्ठतीत्येकस्थं तस्य सौंदर्यस्य सर्ववस्तुगतस्येत्यर्थः

रम
८

दिदृक्षया इष्टुमिच्छेव श्रयत्नाद्यथा तद्देशे तद्योगस्यानानतिक्रमाद्विनिवेशितेन स्थापितेन सर्वेषामुपमाद्रव्याणां चंद्रारवि
दाद्युपमानवस्तूनां समुच्चयेन समाहारेण निर्मिता दिदृक्षयेवेति कल्पोत्प्रेक्षा तादृशी नार्यत्वाद्विशिष्टेति ४९ तां नारदेति॰
कामेन स्वेच्छया चरतीति कामचरो नारदः कदाचित् पितुः समीपे कन्यां तां पार्वतीं प्रेक्ष्य किल प्रेम्णा नत्वन्यथा हरस्य शि
वस्य अर्द्धं हरतीत्यर्द्धहरा हरतेरनुद्यमने क्षिपूप्रत्ययः शरीरस्यार्द्धहरां कुलधुरंधरादिवदव्ययद्वा वंशसमुदायविशेषक
त्वात्समासः अन्यथा तत्र समप्रविभागवचनत्वादर्द्धं नपुंसकमिति अर्द्धं शरीरेति स्यात् एकवधूं असपत्नीकां भार्यां पूर्व
कालेत्यादिना समासः भवित्रीं भाविनीं समादिदेश हरस्यार्द्धांगहारिण्येकपत्नी भविष्यतीत्यादिष्टवानित्यर्थः ५०
गुरुरिति गुरुः पिता गुरुर्गीष्पतिपित्राद्योरित्यमरः अतोनुनारदवचनान्तेहेतोरस्याः पार्वत्याः प्रगल्भे वयसि प्रापि यौव
ने सत्यपि निवृत्तोन्यस्मिन्वरे अभिलाषो यस्य स तथोक्तः [illegible]मासोरिति वैजयंती तस्थौ वरांतरं नान्विष्ट नि॰८
वानित्यर्थः कुतोसौ निर्बंध इत्याशंक्याह ऋत इति तथाहि मंत्रैः पूतं संस्कृतं हव्यं तद्धवि हव्यं हविः कृशानोः पा
वकादृते कृशानुं विना अन्यारादितरर्त इति पंचमी अपराणि तेजांसि सुवर्णादीनि नार्हंतीति नभजंतीति ईश्वरादन्य
स्य वरस्य तद्योग्यत्वाभावादुपेक्षेति भावः ५१ अयाचितेति तर्हि तमेवाहूय दीयतामित्याशंक्याह अद्रिर्हिमवान्
अयाचितारं अयाचमानं देवं महादेवं सुतां पार्वतीं ग्राहयितुं स्वयमाहूय परिग्राहयितुं न शशाक नोसेहे जिदृशि
कृषि तन्मु विग्रहेर्द्विकर्मत्वं तथाहि साधुः सज्जनः साधुर्वार्द्धुषिके चारौ सज्जने चाभिधेयवदिति विश्वः
अभ्यर्थनाभंगभयेन याच्ञाभंगभीत्या इष्टेपि विषये माध्यस्थ्यमौदासीन्यमवलंबते ५२ न च तथैव स्थितं
किंरूपाया यायातारं चिंतितव्या इति वक्तुं शक्नोति यदेति शोभना दंताः यस्याः सा सुदती पार्वती पूर्वे जनने
पूर्वस्मिन् जन्मनि पूर्वादिभ्यो नवभ्यो वेति स्मिन्नादेशविकल्पः पाठांतरे पूर्वदा दाक्षायणीत्वे जनने या
गाग्रोयदा यस्मिन्काले दक्षरोषाच्छरीरं सती तत्याज तदाप्रभृत्येव तद्दिनमारभ्यैव यथा तथा पशूनां पतिर्वि

मुक्तसंगः त्यक्तविषयासंगः सन् अपरिग्रहोऽपत्नीकोऽभूत् स्वयं तरां न परिग्राहेत्यर्थः पत्नीपरिजनादानमूलशा
पाः परिग्रहा इत्यमरः ५३ सकृत्तिवास इत्यमरः अजिनं चर्म कृत्तिः स्त्रीत्यमरः यतात्मा नियतचित्तः सपशुप
तिः तपसे तपोऽर्थं गंगाप्रवाहोक्षिताः शिलादेवदारवो यस्मिंस्तत् प्रोक्तं मृगनाभिगंधिः कस्तूरीगंधवत् तत्र क
स्तूरीमृगसंचारादिति भावः मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः क्वणंतो किंचिद्विगायंतः किन्नराः यस्मिं
स्तत् किमपि हिमाद्रेः प्रस्थं सानुमध्युवास कंचित्तस्थेऽवासेत्यर्थः वसेश्चेति वक्तव्या कर्मकत्वं प्रस्थो
स्त्री सानुमानयोरित्यमरः ५४ गणेति गणाः प्रमथाः गणाः प्रथमसंख्या इति वैजयंती नमेरुप्र
सवावतंसाः सुरपुन्नागकुसुमशेखराः नमेरुः सुरपुन्नाग इति वैजयंती स्पर्शवतीः मृद्वीरित्यर्थः ॥
प्रशंसायां मतुप् भूर्जत्वचः भूर्जपत्रवल्कलानि दधाना वसाना इत्यर्थः मनःशिलाभिर्धातुविशेषैः
विच्छुरिताः अनुलिप्ताश्च सेतः शिलेव शैलीय गंधो बंध विशेषः शिलायां ढ इत्यत्र योगविभागाद्द्वितीयेढ
कं शिलाजतु च शैलेयमिति यादवः तेन गन्धेषु व्याप्तेषु शिलातलेषु निषेदुः उपविविशुः ५५ तुषारसंघातान्हिम
संघातान् शिलाः खुराग्रैः समुल्लिखन् दर्पेण कलो मधुरो दर्पकलः विनिद्रैः भीतैर्गवयैः गोसदृशैर्मृगविशे
षैः कथंचित् कष्टेन दृष्टः ककुदस्यास्तीति ककुद्मान् वृषभः उक्षा उक्ष शोढः सिंहनादध्वनिर्येन स सिंहध्वनिमसह
मानः सन् उत्कनादं उच्चैर्ननाद स्वभावोक्तिरलंकारः तदुक्तं स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनमिति
५६ तत्रेति तपसः फलानां मिंडलादीनां स्वयं विधाता जनयिता दातेत्यर्थः अष्टौ मूर्तयो यस्याः सोऽष्टमू
र्त्तिरीश्वरः भूतार्कचंद्रयज्वानो मूर्तयोऽष्टौ प्रकीर्तिता इति तत्र समस्थे स्वकीयमेव मूर्त्यंतरं मूर्तिभेदं समिद्धं
दीपितं अग्निमादाय प्रतिष्ठाप्य केनापि कामेन कयापि फलकाम्यया तपश्चचार प्रयोजनमनुद्दिश्य मंदोऽपि प्र
वर्तते इति न्यायात्कामेनेत्युक्तं तस्याप्यवाप्तसकामत्वात्केनापीत्युक्तं ५७ अनर्घ्यमिति अद्रिनाथो हिमवाननर्घ्यम्

स्वर्गोऽन्तरिक्षं चेति विश्वः। घोरोक इति पृषोदरादित्वात्साधुः। तुरं त्वरितं साहयत्यभिभवत्यरीनिति तुरासाट्। साहयतेश्वो
रादित्वात्क्विप्। नहिवृतीत्यादिना पूर्वपददीर्घः। प्रसतिग्रहणं तत्पाधिकस्यापि ग्रहणात्। मुग्धबोधस्तु तुरासाहस्थावंत इत्याच
ष्टे। तेन तुरासाहं इदं सहेः साहसिइति षत्वं नास्ति। अजादिषु विभक्तिषु अज्जादूपत्वात्। पुरोधाय पुरस्कृत्य स्वयं चेबोज सत्ता
इदं स्वयं प्रभुत्वं सन्नाविधेरनित्यत्वाद्दाशेन्नुशागाइति गुणो नास्ति। धामसव्मानेन यस्युः अन्तलोकं प्रयुरित्यर्थः। १ तेषामिति दिवौक
10 सा परिम्लानानि परितीणानि मुखश्रीर्येषां तेषां तथोक्तानां तद्वत्पातकान्नवाम्भोजानां शुक्लिमारविंदानां सरस्या प्रतिदीधितिमान्विवस्व
इवाविरभूत् प्रकाशोऽभूत्। प्रकाशे प्राडुरादित्यादित्यमरः। स्फुर्येऽप्यमानेन नतेषांम्यानं गृहगेणस्यचितं। अत्रोपमालंकारः। तन्न
सत्वात्तु स्वतःसिद्धेन भिन्नेन ललमेतेन च धर्मेण तः साम्यमन्येन वर्णस्य वाक्यं वेदे करोपमा। २ गापतर्वेति। अथाविर्भाव
नानंतरं सर्वे देवाः सर्वतःसमंतात्सुखानि यस्य तं सर्वतोमुखं चतुर्मुखमित्यर्थः। वाचां विधानामीशो वाचांमीशं सर्वस्य धा
तारं स्रष्टारं प्रणिपत्य नमस्कृत्य अर्थ्यादनपेताभिरर्थ्याभिः पथ्याभिरित्यर्थः। धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्य
यः। वाग्भिः स्तवनस्थिरेतुष्टुवुरित्यर्थः। इवादेव्वजा संगतिकरामित्रेकरणा प्रथिमिति वक्ष्यादात्मनेपदं। ३ स्तुतिप्रकार
मेवाह। नमइति दशभिः श्लोकैः। हे भगवन् स्तष्टेः प्राक् अन्यारादितरर्तेदिक्शब्दात्तरपदताजाहियुक्ते इति पंचम्यंत
नंदयोगे पंचमी केवलात्मने एकरूपाय। इदमेवैकआसीदिति श्रुतेः। विनीतके वलाविमिति त्रिलिंगे लेकृत्स्नयोरि
त्यमरः। पश्चात्सृष्टिःअनंतरकाले विसृज्यते नेनेति विभागो ममेदोपाधिः। गुणानां सत्वादीनां विभागाय स्यमानम्ये। गुणाः
सत्वेरजस्तमइत्यमरः। भेदमुपेयुषे आपन्नवते न्येपिवानताव्यान न्वानप्रश्नतिनियातः। अतएव त्रिमूर्तये ब्रह्मविष्णुरुद्ररूपि
णे तुभ्यं नमः। नमःस्वस्तीत्यादिना चतुर्थी। उक्तं च। नमो जतुवेरसृष्टौ स्थितौ सत्वमयायच। नमो रुद्राय संहारे त्रिरूपा
य स्वयंभुवे इति। ४ यदमोघमायेन जायतस्त्वजः। यथा सृपासेत शिष्यो यदमोघमवेधंशीजउर्प्ता विसर्ष्टे। शुक्रं ते नारे
तसा च बीजं वीर्यमिंद्रियाणिर्वेत्यमरः। अतो बीजाच्चराचरं स्थावरजंगमात्मकं समाहारे द्वंद्वे एकवद्भावः। विश्वं जगदुत्पन्नमि
ति शेषः। अतस्तस्य विश्वस्य प्रभवः प्रभवत्यस्मादिति प्रभवः कारणमीयसे अवगम्यते। अपां मध्यमहज्जीवोतालु बीयै

मवासृजत् तदंडमभवद्धैमं सहस्रांशुसमप्रभमिति ५ तिसृभिस्त्वमिति हे भगवन् एकः स्रष्टा प्राक् केवलस्त्वं तिसृ
भिरवस्थाभिस्त्रिगुणमयीभिर्महिमानं निजशक्तिमुदीरयन् उज्जृम्भयन् प्रलयस्थितिसर्गाणां कारणतां गतः वि
वरणरूपतामापन्नः तथाहि रजोदोषः ब्रह्मत्वे सृजते लोकान् विष्णुत्वे पालयत्यपि रुद्रत्वे संहरत्येव तिस्रोवस्थाः स्वयंभुव इति ६
स्त्रीपुंसावात्मभागाविति भूतसृष्टिकर्मतत्त्वमुक्तमित्युक्तं सृष्टिकर्तृत्वमाह स्त्रीपुंसाविति स्त्रीपुंसौ अचतुरेत्यादिना। अथ
न्यमानो निपातनः सिसृक्षया स्रष्टुमिच्छया भिन्नमूर्तेर्द्विधाकृतविग्रहस्य तवात्मनो देहस्य भागावात्मभागौ आत्मदेहे
स्वभावे परमात्मनीति वैजयंती तावेवात्मभागौ प्रसूतिभाजः उत्पत्तिभाजः सृज्यत इति सर्गः तस्य पितरौ स्मृतावित्यर्थः
माता च पिता च पितरौ सृष्टौ लोकपितरौ पितामाता इत्येकशेषः अत्र मनुः द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोभवत् अर्द्धेन
नारी तस्यां तु विराजमसृजत्प्रभुरिति ७ स्वकालेति स्वस्य कालपरिमाणेन चतुर्युगसहस्रेण तु ब्रह्मलोकदिनमुच्यते॥
इत्युक्तरूपेण व्यस्ते विभक्ते रात्रिंदिवे रात्र्यहनी यस्य यद्यपि अचतुरेत्यादिसूत्रेण रात्रौ च दिवा च रात्रिंदिवमिति सप्त
म्यर्थे द्वन्द्वे इत्युक्तं तथापि केचिन्मान्यमहार्दिवामन्या रात्रिरित्यादौ कर्मण्यपि वदन्त्यपि प्रातिपदिकार्थे वृत्तिं लेकल्प
चित्प्रयोगाबलात्प्रश्रयणीयेते तव यौ स्वप्नावबोधौ तावेव भूतानां प्रलयोदयौ सृष्टिसंहारौ यथाहुः यदेव देवो जा
गर्त्ति तदेवं चेष्टते जगत् यदा स्वपिति शांतात्मा तदा सर्वं प्रलीयत इति ७ दिने दिनस्य सृष्टिप्रलया अभिप्राया महाप्र
लयस्तु ब्रह्मलोक पंचाशतातमीविलादिति ८ जगद्योनिरिति हे भगवन् त्वं जगद्योनिर्जगत्कारणं स्व
यमयोनिः अजत्वादकारणकः अंतं नीनिर्मते नः यथायथं जगदंतो जगत्संहर्ता स्वयमनंतकः नित्यत्वा
दंतकरहितः जगतां जगदादिस्रष्टा प्रागपि सन्नित्यत्वात् एव त्वमनादिरादिरहितः जगतामीशो नियंता
स्वयमनीश्वरः अनियम्यः स्वतंत्रः यतो वा इमानि भूतानि जायंते इत्यादिश्रुतिरेवात्र प्रमाणं अयोनिरित्यादीन
भक्तस्तु रूपाश्रयेण विरोधाभासः वस्तुतः हि तात्पर्यात् इति विरोधालंकारः यथाहुः विरोधाभासत्वं विरो
धइति ९ आत्मानमिति तव तु तत्प्रपंचस्यैव जन्मादिरोधानाद्ये रचितपराप्रदेत्याह हे भगवंस्त्वं आत्मानं लो

कानुग्रहार्थं ब्रह्मादिरूपेणोत्पादयितुं स्वस्वरूपमात्मनैव वेत्सि जानासि सर्वाणि क्रियाकर्तृव्याप्तज्ञानपूर्वकेति भावः
तथात्मानमात्मनैव तन्मात्रं संबध्यते स्वस्मिन्नेव सृजसि अधिष्ठानमपि स्वयमेवेत्यर्थः स्वे महिम्नि प्रतिष्ठितमिति
स्मृतेः हन्ति नाशमर्थे नेदं सर्वं ससंबध्यते आत्मनास्वेनैव आत्मन्येव प्रलीयसे यस्मिन्नेव प्रलीभवसि लीयते देवा
दिकर्ता कर्तरि लट् प्रकृत्यादिव्यवधानसंख्यानात् सर्वज्ञ आत्मनेति तत्तीयगनहितेव प्रपंचस्येव ज्ञानोत्पत्तिः प्र
लयेषु परातेति फलितार्थः १० द्रवः संघातकठिन इति त्वमित्यनुबध्यते हे भगवन् त्वं द्रवः सरित्समु
द्रादिवद्द्रवात्मकोसि संघाते न संयोगेन कठिनाम्महीमहीधरादिवत् स्थूल लोइंद्रियग्रहणयोग्यो घटादि
वत्स्थूलो तीद्रियः परमाणवादिवत् लघुरुत्पतनयोग्योसि तूलादिवत् गुरुहेमादिवत् अकथनीयोसि व्यक्तः
कार्यरूपश्चासि अव्यक्तेतरः कारणरूपश्चासि एवं विभूतिस्वगणिमादिषु तेतव प्राकाम्य प्रकामस्य भावः प्राका
म्यं यथाकामं ११ उद्गीथप्रणवेति हे भगवन् या सा गिरोवाचा उद्गीथः उपक्रमः प्रणवः ओंकारात्मकः ओंकार
प्रणवो समौ स्यादत्यादत उद्गीथ आरंभ इति चामरः इदमुष्य संसारस्याप्युपलक्षणं ब्राह्मणः प्रणवं कुर्यादादा
वंते च सर्वदा स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यतः इति शिक्षाविशेषवचना गीयते एमिर्यद्विशेषाइत्यर्थः
स्वराः पुस्त्री स्वविशेषादर्थप्रतिपत्तिः यथेंद्रशत्रुः स्वरतोपराधादिति यास्तोत्रिभिन्यायेन स्वरे उदात्तानुदात्तस्वरितैः
उच्चारणमुच्चारणं यासां कर्मप्रतिपाद्यमिति शेषः यज्ञो ज्योतिष्टोमः ननु वेत्यवेदनादिति भावः फलेस्वर्गः कर्मद्वारेणेति शेषः
कर्मस्वर्गौ ब्रह्मगौर्वीरप्युपलक्षणं त्वं तासां गिरां वेदनामित्यर्थः प्रभवत्यस्मादिति प्रभवः कारणं तो १२ त्वामामनंतीति ॥
सांख्यमते नमस्तुवंतीति हे भगवन् त्वां पुरुषस्यार्थेषु भोगापवर्गरूपः तदर्थं प्रवर्तत इति पुरुषार्थप्रवर्तिनी प्रकृतिर्गुणत्रयात्म
काम्मूलकारणं प्रकृतिं यं प्रसूते प्रधानं मूलकारणमित्यादयः आमनंति कथयंतीति म्नाभ्यास इति धातो लट् पाघ्राध्मा
स्थेत्यादिना मनादेशः प्रकृतिपुरुषमेव प्रवान् प्रकृतेरभेदव्यपदेशः अजामेकामित्यादि श्रुतिव्यपदेशात् त्वा
मेव न्यग्भूतिं साक्षित्वेन पश्यतीति तद्दर्शनमुदसीनं तत्रच्छपुरुषं विदुः विदंति विदिता वेतिउसादेशः अजामेका

मित्यादिश्रुतिरत्र मूलं १३ हे भगवन् त्वं पितॄणामपि पितेत्येवं हे भगवन् त्वं पितॄणामग्निष्वात्तादीनामपि पिता तेषामपि त्वं तर्प
णीय इत्यर्थः देवानामिंद्रादीनामपि देवः तेषामपि यजनीय इत्यर्थः पितरो पि परस्तात् सर्वांतरात्मासीत्यर्थः इंद्रियेभ्यः प
रार्थाः परार्थाभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात् पुरुषः परः पुरुषान्न प
रं किंचित् सा काष्ठा सा परा गतिः इति सर्वांतरत्वाद् विधातॄणां वेधसां दक्षादीनामपि विधाता स्रष्टासि १४ त्वमेव हव्यं होता चेति
सर्वत्रान्वितिः सा त्वत्तो नित्यः यद्यपि कालात् जिन्परुणो पवादः अतएव बहुसूत्रकारस्यापि प्रयोगः तेषां च विरोधः शाश्व
तिकः इति तत्रापि प्रयोगात् साधुरित्याहुर्वामनः शाश्वतमिति प्रयुक्तेरिति शाश्वतः त्वमः बहुधा इति हव्यं हविरा
ज्यादिकं जुहोतीति होता यजमानस्त्वमसि भोज्यमभ्यवहार्यमन्नं भोज्यं इति नियातान्कुलाभावः भोक्ता भोज्यं भक्षद
स्त्वमसि विधिः साक्षात्कार्यवस्तु वेदविना साक्षात्कर्ता चासि ध्याता यत्परं वस्तु ध्येयं तत् त्वमसि साक्षात्कारसाधनं मनः तस्मिन्न
यविशेषप्रवाहो ध्यानं इति तेभ्यः १५ सतीनि रिति वेधा ब्रह्मा इति तेभ्यो देवेभ्यः आत्मनो यथा योग इति अपादाने पं
चमी यथार्थाः सत्यास्त्रयः वृद्धये इति इति इदंयें गमाः मनोरमाः विद्युत्करोगमेः सुप्रुपसंख्यानमिति विद्यु
त्प्रत्ययः ऋद्धिंद्यर्थ इत्यादिना मुमागमः देवा अर्कसादेवान्यस्तुवाच १६ पुरास्यकर्तेरिति अथ पक्षविराड् द्रव्यगुण
क्रियाजातिभेदेन चत्वारो अवयवाः अस्या इति चतुष्टयी चतुर्विधा संख्याया अवयवे तयप् द्विरुतात् इत्यादिना
ङीप् शब्दानां प्रवृत्तिर्वैखरी प्रमुखा वाक् वैखरीत्यादि निखिलितिर्मध्यमा श्रुतिगोचरा द्योतितार्था चतस्थेति सप्ता
वागमस्यापि मीति पुरा पिता वस्य पुराणस्य प्रयोगादित्वात् साधुः कवेः कवयितुः तस्य ब्रह्मणः चतुर्मुखैः समी
रिता चतुर्मुखसमीरिता समतीताः अतीतां अगिरिश्रुत्वा प्रसादासि सुखेनानुग्रहः प्रवरणः सन् --- त्यादिना उ
त्तरपदसमासः समाहारसमासे तु चतुर्मुखीति स्यात् अन्यार्थ्या आसीत् चतुर्मुखोच्चारणात् सफलमासीदित्यर्थः

१७ स्वागतंस्वानधीति भगवानाहहेप्राज्यविक्रमाः प्रभूतविक्रमाः प्रत्येभूरिप्रभूतंचेति यादवः स्वान्वकीयानाधिकारान्
नियोगानुपसर्गस्यघञ्मनुष्येवकुलमिति दीर्घः प्रभावेःसामर्थ्यैः अलेप्यसास्यायअधिकारे युक्तियावी
त्यर्थः युगपत्समकालेप्राप्तेभ्यः श्रागतेभ्यः युगपत्प्राप्ताःसहत्कार्यमनुगीयतेइतिभावः युगपत्कुभ्यः
12 दीर्घवाकुभ्यःइत्यर्थः वोयुष्मभ्यंवकुवचनेवसनसाविति वसादेशः क्रियायाग्रहणात्संप्रदानत्वे स्वागतंसोभना
गमनंवाकारकत्रानुसंधेया १८ किमितिदिवसाः पुराकाः वसोनामकुटजेवर्षेतरोकेतनत्यादिकेइतिवे
जयेतीः किमिदंदुरमोवाक्यार्थः परामृश्यतेहिमेनत्किंस्वभावानिभेदगभावानि ज्योतीषिनसमानीवदी
प्तिनाराकुनाशयन्त्योनिमिषिशास्वनः नोयुष्माकंसुरवानि भुवायप्राप्तविमिवात्मीयोयुतिनविभूतिकिंचिद्
पतमित्यर्थः १९ उक्तमेवप्रपंचयति प्रसमान्दिन्त्यादिभिः सप्तभिः अचिंबोनेजसोजकुमानन्निर्वाणादनुक्री
डोल्ल रायुधंप्रतन्त्यादिचित्रप्रभमित्यर्थः वत्रेहंतुरिडस्यपतत्कुलिशंवज्रं कुंठितामस्त्राडयकुंठिताःत्रस्त्र
योयस्यतादृशमिवलक्ष्यतेदृश्यते २० किंचायमिति किंचअयमरिर्मिदुर्धारोदुर्धर्षप्रचेतसोवरुणस्य प्र
चेतावरुणःपाशीत्यमरः शाणोपाशेरज्जुःआयुधविशेषः मंत्रेणाहतवीर्यस्यप्रतिनप्रशाकफणिनः
सर्पस्यदैन्यसौम्यर्थीसआश्रितः स्वगफणेणमिदहरेन्यस्यपाशेसंभवात् दैन्यमिवदैन्यमितिकल्पनादेःसं
६ भावयंस्तुसंदेहोनिदर्शनालंकारः २१ कुबेरस्येति अपविद्धान्यकामदायेनसोयविद्धगदःअतएवभग्न
शारवोद्रुमइवस्थितः कुबेरस्यमनःशल्यदुःखदेतल्लाञ्छत्यशापइत्यर्थः पराभवंशत्रुकृतमितिशेषः
सेतमीवकथयतीवलक्षणयाअनुमायतीत्यर्थः वाहोमुद्रस्याभंगादिवशब्दोप्यतरुन २२ यमोपीति
अतेनाशमितानाशाम्नाशलामितिमकारांतमव्ययं तस्येतिद्वितीयेतिसमासः अलमितासाब्धिबोयस्येतिनिलज
त्वेनदंडेनमंप्रविलखस्थमोपेक्षिभ्रामितिभावः अस्मिन्दंडेनिर्वाणलातस्यशां

ततोल्मुकस्य पलाधर्वलेष्यं तत्कुरुते अलातमुल्मुके ज्ञेयमिति हलायुधः निर्वाणस्य वात इति निर्यातनात्रिष्टानत्वं अयापि
लाघव इति कल्पनालंकारः २३ शमीवेति शतायतन्या तेजः तैयेण शीलता शमीसाद्रित्या स्वगादिसितिशेषः कार्यके नहेतु
नेत्यर्थः चित्रन्यस्ता चित्रलिखिता इव प्रकाममत्यर्थं आलोकनीयतां दृश्यतां गताः २४ पर्याकुलत्वमहतामिति महतो वा
सूनां प्रतापगमनादिति शेषः पर्याकुलत्वात् स्खालिंगतित्वात् हेतोर्वंशभंगोनुमीयते अंभसांशु प्रगमात् प्रातेन्कूलगम
नादुन्नामाद्वहत्वादित्यर्थः अमोघसंरोधः प्रवाहप्रातिबंधश्चानुमीयते २५ आवर्जितेति आवर्जिते सुपरिभवदुःखायनवेषु
जयतो मोमोलिषु जटाजूटेषु विलेखित्रः संलिन्यः शशिकोटयः चंद्रलेखाग्रे यातेन पोलाः रुद्रारगामप्रियमूर्द्धानः एक
दशानामपातिशेषः तत्ताकुंकारशंशिनः ततोकुंकारं शीसंतीतिते तथोक्ताः कुंकारः लत्युतुरुपक इत्यर्थः कुंकारशस्त्रा
फिलड्डा इति भावः २६ लब्धप्रतिष्ठेति प्रथमं पूर्वं लब्धप्रतिष्ठानं तु स्थितयः लब्धावकाशा इत्यन्यत्रेवलवत्तरैः योहषा
तिरेकात्मवलतरैर्निरवकाशत्वादित्यत्रपरैः शत्रुभिरुत्सर्गः सामान्यशास्त्राणि न हिंस्यादित्येवमादीनि आयोपं न
श्मित्यपवादात्तमामालभतेत्येवमादिभिः विशेषशास्त्रैरिवलत्तत्वाद् तत्पः कृतप्रतिष्ठाभंगाः कृत विषयसंको
चेत् यथा इन्यत्रापि विषयसंकोचकत्वं व्यापकत्वं इत्याचार्या निषेधशास्त्रस्य वैधाहिंसापरिहारेण लौकिकमात्रे शाव
स्थयनाद्विषयसंकोच इत्यलमतिगहनावगाहने २७ तद्भूतवत्सा इति तत्तस्मात्कारणाद्धेतोः हितवत्सपुत्रकाः
वत्सलरलकपुत्रादिर्हेव वत्सतुवत्सलीतिविश्वः त्वयैव पिनाम हत्वाद्वत्सा इत्यहूयते आमंत्र्यते तत्र आगताः समा
गताः इतोमतः किंमार्थ्यपदोकिं भिदुंषेइत्यर्थः अतः कप्ययमेलोकरक्षणे प्रथमेव कर्तार इत्याह मयिलोकानां रक्षि
रक्षायु ... वरिष्यितात्रिअन्तलदर्पमपि नास्ति मदपेक्षेत्यर्थः २८ यतो मन्दाविति ततो भगवता गिरेणतेनरं नासव
इंद्रो गुरुं वृहस्पतिं गृहणीष्यतिपित्रायोगि इत्यमरः मंदानिलोद्धृतः केतिनोयं कमलाकरः संइवशोभनइति

13

नेनतथोक्तेनं नेत्राणांसहस्रेणानोदयामास सहस्रमुरुणामास्यातिशयेनद्योतनार्थः अनिमेषाणामपिमयत
